हस्यसंप्राप्तिर्भविष्यतिवदस्वतत् ॥ २१ ॥ केतत्रशूराःसंयोज्याजलेन्वेषयितुंहयम् ॥
कोवानयिष्यतेवाहंकेनोपायेनतद्वद ॥ २२ ॥ इतिराज्ञोवचःश्रुत्वासुमतिर्मंत्रिसत्तमः ॥
उवाचसमयेयोग्यंशत्रुघ्नंहर्षयन्निव॥२३॥स्वामिन्नास्तितवश्रीमच्छक्तिरद्भुतकर्मणः॥
पातालगमनेशक्तिर्जलमध्यादिहस्फुटम् ॥ २४ ॥ अन्यच्चपुष्कलस्यापिशक्तिरस्तिमहा
त्मनः ॥ हनूमतोपिरामस्यपादसेवापरस्यच ॥ २५ ॥ तस्माद्यूयंतत्रगत्वाहयमानयतध्रु
वम् ॥ यतोभवेद्वाहमेधोरघुनाथस्यधीमतः ॥ २६ ॥ ॥शेषउवाच ॥ ॥इतिवाक्यंसमा
श्रुत्यशत्रुघ्नःपरवीरहा ॥ स्वयंविवेशतोयांतर्हनुमत्पुष्कलान्वितः ॥ २७ ॥ यावज्जलंवि
वेशासौतावत्पुरमदृश्यत ॥ अनेकोद्यानशोभाढ्यंनानैवपुटभेदनम् ॥ २८ ॥ तत्रमाणि
क्यरचितैस्तंभैस्वर्णमयेहयम् ॥ बद्धंददर्शरामस्यस्वर्णपत्रसुशोभितम् ॥ २९ ॥ स्त्रियस्त
त्रमनोहारिरूपधारिण्यउत्तमाः ॥ सेवंतेसुंदरीमेकांपर्यंकेसुखमास्थिताम् ॥ ३० ॥ तान्दृ
ष्ट्वाताःस्त्रियःसर्वाःप्रावोचन्स्वामिनींप्रति॥एतेल्पवर्ष्मवयसोमांसपुष्टकलेवराः॥३१॥

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

जलेममज्जासौरामचंद्रहयोवरः ॥ तदासर्वेंमहाशूरास्तत्रविस्मयमागताः ॥ ११ ॥ तेःपर
स्परमेवोचेकथंहयसमागमः ॥ कोत्रगंताजलेवाहमानेतुंतंमहोदयम् ॥ १२ ॥ इतियाव
त्समुद्विग्नामंत्रयंतेपरस्परम् ॥ तावद्वीरशतैः सार्धमाजगामरघोः पतिः ॥ १३ ॥ तान्सर्वा
न्विमनस्कान्वैदृष्ट्वाशत्रुघ्नसंज्ञितः ॥ पप्रच्छमेघगंभीरवाचावीरशिरोमणिः ॥ १४ ॥ किं
स्थितंनिखिलैरद्ययुष्माभिःसंघशोजले ॥ कुत्राश्वोरघुनाथस्यस्वर्णपत्रेणशोभितः ॥
॥ १५ ॥ जलेकिंविनिमग्नोसौहृतोवाकेनमानिना ॥ तन्मेकथयतक्षिप्रंकथंयूयंविमोहि
ताः ॥ १६ ॥ शेषउ० ॥ इतिवाक्यंसमाकर्ण्यराज्ञोरघुवरस्यहि ॥ कथयामासुस्तेसर्वेवीरा
शूरशिरोमणिं ॥ १७ ॥ जनाऊचुः ॥ स्वामिन्वयंनजानीमोमुहूर्तमभवज्जले ॥ निमंमज्ज
ततोनायाद्धयस्तवमनोहरः ॥ १८ ॥ त्वमेवतत्रगत्वेमंवाहमानयवेगतः ॥ अस्माभिस्त
त्रगंतव्यंत्वयासार्द्धंमहामते ॥ १९ ॥ इतिश्रुत्वावचस्तेषांसैनिकानांरघूद्वहः ॥ खेदंप्राप
जनान्पश्यजलसंतरणोद्यतान् ॥ २० ॥ उवाचमंत्रिमुख्यंसकिंकर्तव्यमतःपरम् ॥ कथंवा

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

॥ सूतउवाच ॥ ॥ एतदाख्यानकंश्रुत्वावात्स्यायनउदारधीः ॥ परमंहर्षमापेदेजगादचफ
णीश्वरम् ॥ १ ॥ ॥ वात्स्यायनउवाच ॥ ॥ कथांसंशृण्वतेमह्यंतृप्तिर्नास्तिफणीश्वर ॥
रघुनाथस्यभक्तार्तिहारिकीर्तिकरस्यवै ॥ २ ॥ धन्यआरण्यकोनाममुनिर्वेदधरःपरः ॥ र
घुनाथंसमालोक्यदेहंतत्याजनश्वरम् ॥ ३ ॥ ततोराज्ञोहयःकुत्रगतःकेननियंत्रितः ॥ क
थंतत्ररमानाथकीर्तिर्जाताफणीश्वर ॥ ४ ॥ सर्वंकथयमेतथ्यंसर्वज्ञोस्तियतोभवान् ॥ धरा
धरवपुर्धारीसाक्षात्तस्यस्वरूपधृक् ॥ ५ ॥ ॥ व्यासउवाच ॥ ॥ इतिवाक्यंसमाकर्ण्य
प्रहृष्टेनांतरात्मना ॥ उवाचरामचारित्रंतत्तद्गुणकथोदयम् ॥ ६ ॥ ॥ शेषउवाच ॥ ॥ सा
धुपृच्छसिविप्रर्षेरघुनाथगुणान्मुहुः ॥ श्रुतानश्रुतवत्कृत्वातेषुलोलुपतांदधत् ॥ ७ ॥
ततोनिरगमद्वाहः सैनिकैर्बहुभिर्वृतः ॥ रेवातीरेमनोज्ञेतुमुनिवृंदनिषेविते ॥ ८ ॥ सेनाच
रास्ततःसर्वेयत्रवाहस्ततस्ततः ॥ प्रसर्पंतिनिरीक्षंतस्तन्मार्गेरणकोविदाः ॥ ९ ॥ वाजीग
तोथरेवायान्ह्रदेगाधजलान्विते ॥ भालेस्वर्णभवंपत्रंधारयन्पूजितांगकः ॥ १० ॥ ततो

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

अत्याश्चर्यमभूत्तत्रतन्मेनिगदतःशृणु ॥ वात्स्यायनमुनिश्रेष्ठरामभक्तिपरायण ॥ ५९ ॥
रामंदृष्ट्वामहाराजंयादृशंध्यानगोचरम् ॥ अत्यंतंहर्षमापन्नोजगादसमुनीश्वरान् ॥ ६० ॥
मुनीश्वराःसंशृणुतमद्वाक्यंसुमनोहरम् ॥ मादृशःकोनुभूलोकेभविष्यातिसुभाग्यवान् ॥
॥ ६१ ॥ नास्तिमत्सदृशःकोपिनजातोनभविष्यति ॥ यद्रामभद्रोमांनत्वास्वागतंपरिपृ
ष्टवान् ॥ ६२ ॥ यत्पादपंकजरजःश्रुतिमृग्यंसदैवहि ॥ सोद्यमत्पादयोःपाथःपीत्वापूतमम
न्यत ॥ ६३ ॥ एवंप्रवदंतस्तस्यब्रह्मस्फोटोभवत्तदा ॥ निर्गतंतद्भवंतेजोविवेशरघुनायके
॥ ६४ ॥ पश्यतांसर्वलोकानांसरयूतीरमंडपे ॥ सायुज्यमुक्तिंसंप्रापदुर्लभांयोगिभिर्जनैः ॥
॥ ६५ ॥ दिवितूर्यनिनादोभूद्वीणानादोभवत्तदा ॥ पुष्पवृष्टिःपपाताग्रेपश्यतांचित्रमद्भुत
म् ॥ ६६ ॥ मुनयोप्येतदीक्षित्वाप्रशंसंतोमुनीश्वरम् ॥ कृतार्थोयंमुनिश्रेष्ठोयद्रामवपुषी
क्षितः ॥ ६७ ॥ ॥ इतिश्रीपद्मपुराणेपातालखण्डेरामाश्वमेधेशेषवात्स्यायनसंवादेआर
ण्यकमुनेर्विष्णुलोकगमनोनामसप्तत्रिंशत्तमोऽध्यायः ॥ ३७ ॥ ॥❀॥ ॥❀॥

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

खिलानृपाविप्रंपूजयिष्यंतिभूमिप ॥ ४८ ॥ त्वयोक्तंयन्महाराजविप्रहत्यापनुत्तये ॥
यागंकरोमिविमलंतत्तुहास्यकरंवचः ॥ ४९ ॥ त्वन्नामस्मरणान्मूढःसर्वशास्त्रविवर्जि
तः ॥ सर्वपापाब्धिमुत्तीर्यसगच्छेत्परमंपदम् ॥ ५० ॥ सर्ववेदेतिहासानांसारार्थोयमति
स्फुटः ॥ यावन्नरामस्मरणंक्रियतेपापतारकं ॥ ५१ ॥ तावद्गर्जंतिपापानिब्रह्महत्यासमा
निच ॥ नयावत्प्रोच्यतेनामरामचंद्रतवस्फुटम् ॥ ५२ ॥ त्वन्नामगर्जनंश्रुत्वामहापातक
कुंजराः ॥ पलायंतेमहाराजकुत्रचित्स्थानलिप्सया ॥५॥ तस्मात्तवकथंहत्यामहापुण्य
दर्शन ॥ रामत्वत्सुकथांश्रुत्वापूतःसद्योभविष्यति ॥ ५४ ॥ मयापूर्वंकृतयुगेगंगाया
स्तीरवासिनाम् ॥ ऋषीणांमुखतोवाक्यंश्रुतमेतत्पुराविदाम् ॥ ५५ ॥ तावत्पापभियःपुं
सांकातराणांसुपापिनां ॥ यावन्नवदतेवाचारामनाममनोहरम् ॥ ५६ ॥ तस्माद्धन्योहम
धुनाममसंसृतिनाशनम् ॥ सांप्रतंसुलभंरामचंद्रत्वद्दर्शनादभूत् ॥ ५७ ॥ इत्युक्तवंतंसमु
निंपूजयामासतत्रवै ॥ सर्वेमुनिजनाःसाधुसाधुवाक्यमितिब्रुवन् ॥ ५८ ॥ ॥ शेष७० ॥

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

मचंद्रस्तस्यपादौसुचिरंनतवान्महान् ॥ ब्रह्मण्यदेवपावित्र्यंकृतमद्यतनोमम ॥ ३८ ॥ इ
तिवाक्यंवदंस्तस्यपादयोः पतितःप्रभुः ॥ सुरासुरनमन्मौलिमणिनीराजितांघ्रिकः ॥
॥ ३९ ॥ प्रणतंतंनृपश्रेष्ठंवाडवेंद्रोमहातपाः ॥ गृहीत्वाभुजयोर्मध्यमालिंग्यचप्रियंप्रभुम्
॥ ४० ॥ कौसल्यातनयस्तंवाउच्चैर्मणिमयासने ॥ संस्थाप्यचपदोर्युग्मंजलेनाक्षाल
यत्प्रभुः ॥ ४१ ॥ पादावनेजनोदंतुमस्तकेधाद्धरिःस्वयम् ॥ पवित्रितोद्यसगणःसकुटुंब
इतिब्रुवन् ॥ ४२ ॥ चंदनेनविलिप्याथगांचप्रादात्पयस्विनीं ॥ उवाचचवचोरम्यंदेव
देवेंद्रसेवितः ॥ ४३ ॥ स्वामिन्मखोमयावाजिमेधसंज्ञःक्रियेतह ॥ सोयंत्वच्चरणायाता
द्यपूर्णोभविष्यति ॥ ४४ ॥ अद्यमेब्रह्महत्योत्थपापहानिंकरिष्याति ॥ अश्वमेधःक्रतुर्यु
ष्मच्चरणेनपवित्रितः ॥ ४५ ॥ इतिवाक्यंब्रुवाणंतंराजराजेंद्रसेवितम् ॥ आरण्यकउवा
चेदंहसन्माध्व्यागिरामुनिः ॥ ४६ ॥ स्वामिंस्तवतुयुक्तंहिवचोब्रह्मण्यभूमिप ॥ त्वन्मूर्त
योमहाराजब्राह्मणावेदपारगाः ॥ ४७ ॥ त्वंयदाब्रह्मपूजादिशुभंकर्मकरिष्यसि ॥ ततो

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

रामकृतालयां ॥ २७ ॥ सदूरान्नगरींदृष्ट्वासूर्यवंशनृपोषिताम् ॥ पदातिरभवद्वेगाद्रघुनाथ
दिदृक्षया ॥ ३८ ॥ संप्राप्यनगरींरम्यामयोध्यांजनशोभिताम् ॥ मनोरथसहस्रेणसंरूढो
रामदर्शने ॥ २९ ॥ ददर्शतत्रसरयूतीरेमंडपशोभिते ॥ रामंदूर्वादलश्यामंकंजकांतिविलो
चनम् ॥ ३० ॥ मृगशृंगंकटौरम्यंधारयंतंश्रियान्वितम् ॥ ऋषिवृंदैर्व्यासमुख्यैर्वृतंशूरैःसुसे
वितम् ॥ ३१ ॥ भरतेनसुमित्रायास्तनूजेनपरीवृतम् ॥ ददंतंदीनसंघेभ्योदानानिप्रार्थिता
नितम् ॥ ३२ ॥ विलोक्यारण्यकाख्योसौकृतार्थइतिमन्यत ॥ मल्लोचनेपद्मदलसमाने
रामलोकके ॥ ३३ ॥ अद्यमेसर्वशास्त्रस्यज्ञातृत्वंबहुसार्थकम् ॥ येनश्रीराममाज्ञायप्रा
प्तोयोध्यापुरीमिमाम् ॥ ३४ ॥ इत्येवमादिवचनानिवहन्हृष्टोरामांघ्रिदर्शनसुहर्षितगात्र
शोभी ॥ प्रायाद्रमेश्वरसमीपमगम्यमन्यैर्योगेश्वरैरपिविचारपरैःसुदूरम् ॥ ३५ ॥ धन्यो
हमद्यरामस्यचरणावक्षिगोचरौ ॥ करिष्यामिवचोरम्यंवदन्राममवेक्षत ॥ ३६ ॥ रामो
पिवाडवश्रेष्ठंज्वलंतंस्वेनतेजसा ॥ तपोमूर्तिधरंवीक्ष्यप्रत्युत्थानमथाकरोत् ॥ ३७ ॥ रा ॥१०८॥

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

मुवाचेदंवचोविविधशोभनम् ॥ आरण्यकंमुनिवरंरामांघ्रिध्याननिर्भृतम् ॥ १७ ॥ स्वा
मिन्नयंदशरथकुलदीपांकुरोमहान् ॥ रामभ्रातामहाशूरःशत्रुघ्नःप्रणमत्यसौ ॥ १८ ॥ लव
णोयेननिहतःसर्वलोकभयंकरः ॥ कृतार्थ्वसुखिनःसर्वेमुनयःसुतपोधनाः ॥ १९ ॥ एष
पुष्कलनामात्वांनमत्युद्भटसेवितः ॥ येनाधुनामहावीराजिताःसमरमंडले ॥ २० ॥ जा
नीह्येनंबहुगुणंरामामात्यंमहाबलम् ॥ प्राणप्रियंरघुपतेःसर्वज्ञंधर्मकोविदम् ॥ २१ ॥ सु
बाहुरयमत्युग्रोवैरिवंशदवानलः ॥ रामपादाब्जरोलंबोनमतित्वांमहायशाः॥२२॥सुम
दोप्ययेषपार्वत्यादत्तरामांघ्रिसेवया ॥ प्राप्तोधुनासौसंसारवार्धिनिस्तरणंमहत्॥२३॥ स
त्यवानयमश्वंयः प्राप्तमाश्रुत्यसेवकात् ॥ राज्यंनिवेदयामाससत्वांप्रणमतिक्षितौ ॥
॥ २४ ॥ इतिवाक्यंसमाकर्ण्यसमालिंग्यसमादरात् ॥ चकारारण्यकऋषिःस्वागतंफल
कादिना ॥ २५ ॥ तेहृष्टास्तत्रवसतिंचक्रुर्मुनिवराश्रमे ॥ प्रातर्नित्यक्रियांकृत्वारेवायांते
महोद्यमाः ॥ २६ ॥ नरयानमथारोप्यसेवकैःसहितंमुनिम् ॥ शत्रुघ्नःप्रापयामासायोध्यां

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

यंनजानीमःकिमभूद्धयसत्तमे ॥ ११ ॥ गच्छतोवाहवर्यस्यमनोवेगस्यभूपते ॥ आक
स्मिकोभवत्तस्यगात्रस्तंभोमहामते ॥ १२ ॥ कशाभिस्ताडितोस्माभिःपरंतत्रचचाल
न ॥ एवंविचार्ययत्कर्मतत्कुरुष्वनृपोत्तम ॥ १३ ॥ तदाविस्मयमापन्नोभूपतिःसहसैनि
कैः ॥ जगामसहितःसर्वैर्हयस्यमहतोन्तिके ॥ १४ ॥ पुष्कलोबाहुनाधृत्वाचरणौतस्य
भूतलात् ॥ उत्पाटयामासतदापरंनोचेलतुस्ततः ॥ १५ ॥ बलेनबलिनाक्रांतोनाकम्प
तहयस्तदा ॥ हनूमांस्तंसमुद्धर्तुंमतिंचक्रेमहामनाः ॥ १६ ॥ लांगूलेनसमावेष्ट्यबलेनब
लिनांवरः ॥ आचकर्षबलाद्वाहंनचचालतथापिसः ॥ १७ ॥ तदोवाचकपिश्रेष्ठोहनूमा
न्विस्मयान्वितः ॥ शत्रुघ्नंबलिनांश्रेष्ठंवीराणांपरिशृण्वताम् ॥ १८ ॥ मयाद्रोणोलांगुले
नलीलयोत्पाटितोधुना ॥ परमत्रमहाश्चर्यंकम्पतेनहयोल्पकः ॥ १९ ॥ दृष्टमत्रनिदानं
हिवीरैर्बलिभिरुद्धतैः ॥ आकृष्टोपिनचस्थानाच्चचालतिलमात्रतः ॥ २० ॥ कपिभाषि
तमाकर्ण्यशत्रुघ्नोविस्मयान्वितः ॥ सुमतिंमंत्रिणांश्रेष्ठमुवाचवदतांवरः ॥ २१ ॥ ॥ श
CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

त्रुघ्नउवाच ॥ ॥ मंत्रिन्किमभवद्वाहस्तंभेनवपुषोनघ ॥ कोत्रोपायोविधेयःस्याद्येनवा
हगतिर्भवेत् ॥२२॥ सुमतिरुवाच ॥ स्वामिन्कश्चिन्मुनिर्मृग्योऽखिलज्ञानविचक्षणः ॥ दे
शोद्भवमहंजानेप्रत्यक्षंनापरोक्षजम् ॥ २३ ॥ ॥ शेषउवाच ॥ ॥ इतिवाक्यंसमाकर्ण्य
सुमतेर्धर्मकोविदः ॥ अन्वेषयामासमुनिंसेवकैःसहशोभनम् ॥ २४ ॥ तेसर्वेसर्वतोगत्वा
मुनिंधर्मविदंभटाः ॥ व्यालोकयंतःसर्वत्रनचापश्यन्मुनीश्वरम् ॥ २५ ॥ एकस्त्वनुचरो
विप्रगतोयोजनमात्रतः ॥ पूर्वस्यांदिशमुद्युक्तःपश्यतिस्ममहाश्रयम् ॥ २६ ॥ यत्रनिर्वैरि
णःसर्वेपशवोजनतास्तथा ॥ गंगास्नानहताशेषकिल्बिषाःसुमनोहराः ॥ २७ ॥ यत्रके
चित्तपःश्रेष्ठंकुर्वंतिस्महुताशनैः ॥ धूमैरधोमुखाःपत्रैर्वायुभिःस्वोदरंभराः ॥ २८ ॥ यत्रा
ग्निहोत्रजोधूमःपवित्रयतिसर्वदा ॥ अनेकमुनिसंहृष्टोमुक्तपत्रलतोत्तमः ॥ २९ ॥ तमाश्र
मंमुनेर्ज्ञात्वाशौनकस्यमनोहरम् ॥ न्यवेदयन्नृपायासौविस्मयाविष्टचेतसे ॥ ३० ॥ तच्छु
त्वाहर्षितोत्यंतंशत्रुघ्नःसहसेवकैः ॥ हनूमत्पुष्कलाद्यैश्चसंयुतोगात्तदाश्रमम् ॥ ३१ ॥ त

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

त्रवीक्ष्य मुनिश्रेष्ठं सम्यग्घुतहुताशनम् ॥ प्रणम्य दंडवत्तस्य चरणौ पापहारिणौ ॥३२॥ त
मागतं नृपं ज्ञात्वा शत्रुघ्नं बलिनां वरम् ॥ अर्घ्यपाद्यादिकं चक्रे प्रीतस्तद्दर्शनादभूत् ॥ ३३ ॥
सुखोपविष्टं विश्रांतं नृपं प्राह मुनीश्वरः ॥ किमर्थमटनं देव महत्पर्यटनं तव ॥ ३४ ॥ त्वादृशाः
पृथिवीं सर्वां नृपा वैन भ्रमंति चेत् ॥ तदा दुष्टजनाः साधून्बाधंते विगतज्वरान् ॥ ३५ ॥ क
थयस्व महीपाल शत्रुघ्न बलिनां वर ॥ सर्वं शुभाय नो भूयात्तव पर्यटनादिकम् ॥ ३६ ॥ ॥ शे
ष उवाच ॥ ॥ इत्युक्तवंतं भूदेवं प्रत्युवाच महीश्वरः ॥ गद्गदस्वरया वाण्या हर्षितस्वीयवि
ग्रहः ॥ ३७ ॥ ॥ शत्रुघ्न उवाच ॥ ॥ अकस्मादभवच्चित्रं रामाश्वस्य मनोहृतः ॥ नातिदूरे
त्वदावासात्तच्छृणुष्व विदां वर ॥ ३८ ॥ उद्याने तव शोभाढ्ये यदृच्छातो हयो गतः ॥ तत्प्रां
ते तस्य वाहस्य गात्रस्तंभोऽभवत्क्षणात् ॥ ३९ ॥ तदा मे बलिनो वीराः पुष्कलाद्या मदोत्कटाः ॥
बलादाचकृषुर्वाहं न चचाल तथाप्यसौ ॥ ४० ॥ अस्मानपारदुःखाब्धौ मग्नान्प्रोत्तितरिः
स्मृतः ॥ दैवादृष्टः सुभाग्यैस्त्वं कथयस्व निदानकम् ॥ ४१ ॥ ॥ शेष उवाच ॥ ॥ एवं पृष्टो मु

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

निवरः क्षणंदध्यौमहामतिः ॥ ततःकारणसंयुक्तंविचारेणदधद्वधम् ॥ ४२ ॥ क्षणात्तज्ज्ञा
नतांप्राप्यविस्मयोत्फुल्ललोचनः ॥ जगादसमहीपालंदुःखितंसंशयान्वितम् ॥ ४३ ॥
॥ शौनकउवाच ॥ ॥ शृणुराजन्प्रवक्ष्यामिहयस्तंभस्यकारणम् ॥ यच्छ्रुत्वामुच्यतेदुः
खादतिचित्रकथानकम् ॥ ४४ ॥ गौडदेशेमहारण्येकावेरीतिविभूषिते॥ वाडवःसात्वको
नाम्नाचचोरपरमंतपः ॥ ४५ ॥ एकाहंपयसःप्राशीदिनैकंवायुभक्षकः ॥ दिनैकंतुनिराहा
रएवंत्रिदिनमुन्नयेत् ॥ ४६ ॥ एवंव्रतेप्रवृत्तस्यकालःसर्वक्षयंकरः ॥ जग्राहस्वस्यदंष्ट्रायां
मृतिंप्रापमहाव्रती ॥ ४७ ॥ विमानेसर्वशोभाढ्येसर्वरत्नविभूषिते ॥ अप्सरोभिःसहक्री
डन्ययौमेरोःशिखास्थितौ ॥ ४८ ॥ जंबूनाममहावृक्षस्तत्रसेव्यरसोभवत् ॥ नदीजांब
वतीसंज्ञास्वर्णद्रवसमन्विता॥४९॥ तस्यांमुनयइच्छाभिःक्रीडंतेकुतुकान्विताः॥ अने
कतपसापुण्याःसर्वसौख्यसमन्विताः॥५०॥तत्रासौस्वेच्छयाक्रीडन्नप्सरोभिर्मुदान्वि
तः ॥ प्रतीपमाचरत्तेषांस्वाभिमानमदोद्धतः ॥ ५१ ॥ ततःशप्तःसमुनिभीराक्षसोभवद्

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

र्मुख ॥ ततोतिदुःखितःप्राहमुनीन्विद्यातपोधनान् ॥ ५२ ॥ अनुगृह्णंतुमांसर्वेविप्रायूयंकृपा
लवः ॥ तदातैरनुगृण्हीतोयदारामहयंभवान् ॥ ५३ ॥ स्तंभयिष्यतिवेगेनततोरामकथा
श्रुतिः ॥ पश्चान्मुक्तिर्भवित्रीतेशापादस्मात्सुदारुणात् ॥ ५४ ॥ सप्रोक्तोमुनिभिर्देवैशराक्षस
त्वामितःप्रभो ॥ स्तंभयामासरामाश्वंमोचयानघकीर्तनैः ॥ ॥ इतिश्रीपद्मपुराणेपाता
लखण्डेरामा०शेषवात्स्यायनसंवादेशापकीर्तनंनामसप्तचत्वारिंशत्तमो० ॥ ४७ ॥ ॥
॥ शेषउ० ॥ ॥ इतिप्रोक्तंतुमुनिनासंश्रुत्यपरवीरहा ॥ विस्मयंमानयामासहृदिशौनकम
ब्रवीत् ॥ १ ॥ ॥ शत्रुघ्नउवाच ॥ ॥ कर्मणोगहनावार्तायययासात्वकनामधृक् ॥ दिवंप्रा
प्तोपिमहतात्कर्मणाराक्षसीकृतः ॥ २ ॥ स्वामिन्वदमहर्षेत्वंकर्मणांचगतिर्यथा ॥ येनक
र्मविपाकेनयादृशंनरकंभजेत् ॥ ३ ॥ ॥ शौनकउवाच ॥ ॥ धन्योसिराघवश्रेष्ठयत्तेमति
रियंशुभा ॥ जानन्नपिहितार्थायलोकानांत्वंब्रवीषिभोः ॥ ४ ॥ कथयामिविचित्राणांक
र्मणांविविधागतीः ॥ ताःशृणुष्वमहाराजयच्छुत्वामोक्षमाप्नुयात् ॥ ५ ॥ परवित्तंपराप

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

त्यंकलत्रंपारकंचयः ॥ कालपाशेनसंबद्धोयमदूतैर्महाबलैः ॥ ६ ॥ तामिस्रेपात्यतेता
वद्यावद्वर्षसहस्रकम्॥ तत्रताडनमुद्भूताःकुर्वंतियमकिंकराः ॥७॥ पापभोगेनसंतप्तस्ततो
योनिंतुशौकरीं ॥ तत्रभुक्त्वामहादुःखंमानुषत्वंगमिष्यति ॥ ८ ॥ रोगादिचिह्नितंतत्र
दुर्यशोज्ञाप्यकंस्वकम् ॥ भूतद्रोहंविधायैवकेवलंस्वकुटुंबकम् ॥ ९ ॥ पुष्णातिपापनिरतः
सोंधतामिस्त्रकेपतेत्॥येनराइहजंतूनांवधंकुर्वंतिवैमृषा॥१०॥तेरौरवेनिपात्यंतेभिद्यंतेरु
रुभीरुषा॥ यःस्वोदरार्थेभूतानांवधमाचरतिस्फुटम् ॥११॥ महारौरवसंज्ञेतुपात्यतेसय
माज्ञया ॥ योवैनिजंतुजनकंब्राह्मणंद्वेष्टिपापकृत् ॥ १२ ॥ कालसूत्रेमहादुष्टेयोजनायु
तविस्तृते ॥ यावंतिपशुरोमाणिगवांद्वेषंकरोतियः ॥ १३ ॥ तावद्वर्षसहस्राणिपच्यतेय
मकिंकरैः ॥ योभूमौभूपतिर्भूत्वादंडायोग्यंतुदंडयेत् ॥ १४ ॥ करोतिब्राह्मणस्यापिदेहदं
डंचलोलुपः ॥ ससूकरमुखैर्दुष्टैःपीड्यतेयमकिंकरैः ॥ १५ ॥ पश्चाद्दुष्टासुयोनीषुजायते
पापमुक्तये ॥ ब्राह्मणानांगवांयेतुद्रव्यंवित्तंतथाल्पकम् ॥ १६ ॥ वृत्तिंवागृण्हतेमोहाल्लु

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

पंतिस्वबलान्नराः॥ तेपरत्रांधकूपेचपात्यंतेचमहार्दिताः॥ १७॥ योनास्वयमुपाहृत्य
मधुरंचात्तिलोलुपः॥ नदेवायनसुहृद्भ्योददातिरसनापरः॥१८॥ सपतत्येवनरकेकृमिभो
जनसंज्ञिते॥ अनापदिनरोयस्तुहिरण्यादीन्यपाहरेत्॥१९॥ ब्रह्मस्वंवामहादुष्टेसंदेशेनर
केपतेत्॥ यःस्वदेहंप्रपुष्णातिनान्यंजानातिमूढधीः॥ २०॥ सपात्यतेतैलतप्तेकुंभीपाके
तिदारुणे॥ योनागम्यांस्त्रियंमोहाद्योषिद्भावाच्चकामयेत्॥ २१॥ तंतयाकिंकराःसूर्म्या
परिरंभंचकुर्वते॥ येबलाद्वेदमर्यादांलुंपंतिस्वबलोद्धताः॥ २२॥ तेवैतरण्यांपतितामांस
सशोणितभक्षकाः॥ वृषलींयःस्त्रियंकृत्वातयागार्हस्थ्यमाचरेत्॥ २३॥ पूयोदेनिपत
त्येवमहादुःखसमन्वितः॥ येदंभमाश्रयंतेवैधूर्तालोकस्यवंचने॥ २४॥ वैशसेनरकेमू
ढाःपतंतियमताडिताः॥ येसवर्णांस्त्रियंमूढारेतःस्वंपाययंतिच॥ २५॥ रेतःकुल्यासुते
पापारेतःपानेषुतत्पराः॥ येचौरावन्हिदादुष्टागरदाग्रमलुंठकाः॥ २६॥ सारमेयादिनेतै
वैपात्यंतेपातकान्विताः॥ कूटसाक्ष्यंवदत्यद्धापुरुषःपापसंभृतः॥ २७॥ पारकीयंतुद्र

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

व्यंयोहरतिप्रसभंबली ॥ सोवीचिनरकेपापीअवाग्वक्त्रःपतत्यधः ॥ २८ ॥ तत्रदुःखंमह
द्भुक्त्वापापिष्ठांयोनिमाव्रजेत् ॥ योनरोरसनास्वादात्सुरांपिबतिमूढधीः ॥ २९ ॥ तंपा
ययंतिलोहस्यरसंधर्मस्यकिंकराः ॥ योगुरूनवमन्येतस्वविद्याचारदर्पितः ॥ ३० ॥
समृतःपात्यतेक्षारकर्दमेधोमुखःपुमान् ॥ विश्वासघातंकुर्वंतियेनराधर्मनिष्कृताः ॥ ३१
शूलप्रोतेचनरकेपात्यंतेबहुयातनाः ॥ पिशुनोयोनरान्सर्वानुद्वेजयतिवाक्यतः ॥ ३२ ॥
दंदशूकेचपतितोदंदशूकैःसदश्यते ॥ एवंराजन्ननेकेवैनरकाःपापकारिणाम् ॥ ३३ ॥ पा
पंकृत्वाप्रयांत्येतेपीडांयांतिसुदारुणाम् ॥ यैर्नश्रुतारामकथानपरोपकृतिःकृता ॥ ३४ ॥
तेषांसर्वाणिदुःखानिभवंतिनरकांतरे ॥ अत्रयस्यसुखंभूयात्तस्यस्वर्गइतीर्यते ॥ येदुः
खिनोरोगयुतानरकादागताश्चते ॥ ३५ ॥ ॥ शेषउवाच ॥ ॥ एतच्छ्रुत्वामहीपालःकं
पमानःक्षणेक्षणे ॥ पप्रच्छभूयस्तंविप्रंसर्वसंशयनुत्तये ॥ ३६ ॥ तत्तत्पापस्यचिन्हानिकं ॥१४०॥
थयस्वमहामुने ॥ केनपापेनकिंचिन्हंभूलोकेउपजायते ॥ ३७ ॥ इतिश्रुत्वातुतद्वाक्यमु

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

निःप्रोवाचभूपतिम् ॥ शृणुराजन्प्रवक्ष्यामिचिन्हानिपापकारिणं ॥३८॥ शौनकउ० ॥
सुरापःश्यामदंतश्चनरकांतप्रजायते ॥ ३९ ॥ अभक्षभक्षकारीचजायतेगुल्मकोदरः ॥
उदक्यावीक्षितंभुक्त्वाजायतेकृमिलोदरः ॥ ४० ॥ श्वमार्जारादिसंस्पृष्टंभुक्त्वादुर्गंधि
मान्भवेत् ॥ अनिवेद्यसुरादिभ्योभुंजानोजायतेनरः ॥४१॥ उदरेरोगवान्दुःखीमहारोग
प्रपीडितः ॥ परान्नविघ्नकरणादजीर्णमभिजायते ॥ ४२ ॥ मंदोदराग्निर्भवतिसतिद्रव्येक
दन्नदः ॥ विषदश्छर्दिरोगीस्यान्मार्गहापादरोगवान् ॥ ४३ ॥ पिशुनोनरकस्यांतेजायते
श्वासकासवान् ॥ ४४ ॥ धूर्तोपस्माररोगीस्याच्छूलीचपरतापनः ॥ दावाग्निदापकश्चै
वरक्तातिसारवान्भवेत् ॥ ४५॥ सुरालयेजलेवापिशकृत्क्षेपंकरोतियः ॥ गुदरोगोभवेत्त
स्यपापरूपःसुदारुणः ॥ ४६ ॥ गर्भपातनजारोगाःक्षयमेहजलोदराः॥ प्रतिमाभंगकारी
चअप्रतिष्ठश्चजायते ॥४७॥दुष्टवादीखंडितःस्यात्खल्वाटःपरनिंदकः ॥ सभायांपक्षपा
तीचजायतेपक्षघातवान् ॥ ४८॥ परोक्तहास्यकृत्काणःकुनखीविप्रहेमहृत् ॥तुंदीवरीता

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

म्रचौरः कांस्यहृत्पुंडरीकिकः ॥ ४९ ॥ त्रपुहारीचपुरुषोजायतेपिंगमूर्द्धजः ॥ शीसहारी चपुरुषोजायतेशीर्षरोगवान् ॥ ५० ॥ घृतचौरस्तुपुरुषोजायतेनेत्ररोगवान् ॥ लोहहारी चपुरुषोजायतेमेदसावृतः ॥ ५१ ॥ चर्महारीचपुरुषोजायतेमेदसावृतः ॥ मधुचौरस्तुपुरुषोजायतेबस्तगंधवान् ॥ ५२ ॥ तैलचौर्येणभवतिनरः काद्वातपीडितः ॥ आमान्नहरणाच्चैवदंतहीनः प्रजायते ॥ ५३ ॥ पक्वान्नहरणाच्चैवजिव्हारोगयुतोभवेत् ॥ मातृगामीचपुरुषोजायतेलिंगवर्जितः ॥ ५४ ॥ गुरुजायाभिगमनान्मूत्रकृच्छ्रः प्रजायते ॥ भगिनींचैवगमनेपीतकुष्ठः प्रजायते ॥ ५५ ॥ स्वसुतागमनेचैवरक्तकुष्ठंप्रजायते ॥ भ्रातृभार्याभिगमनेगुल्मकुष्ठंप्रजायते ॥ ५६ ॥ स्वामिगम्यादिगमनेजायतेगंडमंडलम् ॥ विश्वस्तभार्यागमनेगजचर्माप्रजायते ॥ ५७ ॥ पितृष्वस्रभिगमनेदक्षिणांगेव्रणीभवेत् ॥ मातुलान्यास्तुगमनेवामांगेव्रणवान्भवेत् ॥ ५८ ॥ पितृव्यपत्नीगमनेकटौकुष्ठंप्रजायते ॥ मित्रभार्याभिगमनेमृतभार्यः प्रजायते ॥ ५९ ॥ स्वगोत्रस्त्रीप्रसंगेनजायते

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

चभगंदरः ॥ तपस्विनीप्रसंगेनप्रमेहोजायतेनरे ॥ ५९ ॥ श्रोत्रियस्त्रीप्रसंगेनजायते
नासिकाव्रणी ॥ दीक्षितस्त्रीप्रसंगेनजायतेदुष्टरक्तसृक् ॥ ६० ॥ स्वजातिजायागमने
जायतेहृदयव्रणी ॥ जात्युन्नतस्त्रीगमनेजायतेमस्तकव्रणी.॥ ६१ ॥ पशुयोनौचग
मनान्मूत्रघातःप्रजायते ॥ एतेदोषानराणांस्युर्नरकांतेनसंशयः ॥ ६१ ॥ स्त्रीणामपि
भवंत्येतेतत्तत्पुरुषसंगमात् ॥ एवंराजन्हिचिन्हानिकीर्तितानिसुपापिनाम् ॥ ६२ ॥ दा
नपुण्यप्रसंगेनतीर्थादिक्रिययातथा ॥ रामस्यचरितंश्रुत्वातपसावाक्षयंव्रजेत् ॥ ६३ ॥
सर्वेषामेवपापानांहरिकीर्तिधुनिर्नृणाम् ॥ क्षालयेत्पापिनांपंकंनात्रकार्याविचारणा ॥
॥ ६४ ॥ योनावमन्यतहरिंतस्ययागाविधिश्रुताः ॥ तीर्थान्यपिसुपुण्यानिपावितुंनक्षमा
णितम् ॥ ६५ ॥ हसतेकीर्त्यमानंयश्चरित्रंज्ञानदुर्बलः ॥ नतस्यनरकान्मुक्तिः कल्पांतेपि
भविष्यति ॥ ६६ ॥ याहिराजन्विमोक्षार्थंहयस्यानुचरैःसह ॥ श्रावयश्रीशचरितंयतोवा
हगतिर्भवेत् ॥ ६७ ॥ ॥ शेषउवाच ॥ ॥ इतिश्रुत्वाप्रहृष्टोभूच्छत्रुघ्नःपरवीरहा ॥ प्रणम्य

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri

तंपरिक्रम्ययययौसेवकसंयुतः ॥ ६८ ॥ तत्रगत्वासहनुमान्हयवर्यस्यपार्श्वतः ॥ उवाच
रामचरितंमहादुर्गतिनाशकम् ॥ ६९ ॥ याहिदेवविमानंस्वंरामकीर्तनपुण्यतः ॥ स्वैरंचर
स्वलोकेत्वंमुक्तोभवकुयोनितः ॥७०॥ इतिवाक्यंसमाकर्ण्यशत्रुघ्नोयावदास्थितः ॥ ता
वद्ददर्शविमलंदेवंवैमानिकंवरम् ॥ ७१ ॥ सउवाचविमुक्तोहंरामकीर्तनसंश्रुतेः ॥ यामि
स्वभवनंराजन्नाज्ञापयमहामते ॥ ७२ ॥ इत्युक्त्वाप्रययौदेवोविमानेस्वेपरिस्थितः ॥ त
दाविस्मयमापुस्तेशत्रुघ्नेनसहानुगाः ॥७३॥ततोवाहोविनिर्मुक्तोगात्रस्तंभाच्चभूतलात्॥
॥ ययौतद्विपिनंसर्वंभ्रमन्पक्षिसमाकुलम् ॥ ७४ ॥ ॥ इतिश्रीपद्मपुराणेपातालखंडेरा
माश्वमेधेशेषवात्स्यायनसंवादेहयनिर्मुक्तिर्नामाष्टचत्वारिंशत्तमोऽध्यायः ॥ ४८ ॥
॥ शेषउवाच ॥ ॥ मासाःसप्ताभवंस्तस्यहयवर्यस्यहेलया ॥ चरतोभारतंवर्षमनेकनृप
पूरितम् ॥ १ ॥ सपूजितोभूपवरैःपरीत्यवरभारतं ॥ परीवृतोवीरवरैःशत्रुघ्नादिभिरुद्भटैः॥
॥ २ ॥ सबभ्रामबहून्देशान्हिमालयसमीपतः ॥ नकोपितंनिजग्राहहयंरामबलंस्मरन् ॥

CC-0 Shri Krishna Museum, Kurukshetra. Digitized by eGangotri